No. 4080. गदाधरीयव्याख्या.

GADĀDHARĪYAVYĀKHYĀ.

Pages, 114. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 4006.

Commentary on Sāmānyanirukti incomplete.

Author unknown.

Beginning:

तत्त्वनिर्णयविजयप्रयोजकत्वादिति मूले पञ्चम्यर्थस्य तज्ज्ञानजन्यजिज्ञासाधीनत्वस्य निरूपणे अन्वयादेव सङ्गतिप्रदर्शनसिद्धौ तत्प्रसङ्गादिति पूरणमनुचितमित्याशङ्कां निरस्यति—हेत्वाभासेति । प्रसङ्गस्यापीति स्मृतत्वे सति उपोद्घातादिपञ्चकभिन्नस्य हेत्वाभासस्यापीत्यर्थः ।

End:

नियमतः विशिष्टान्तरविषयित्वाप्रयोजकत्वेनैतल्लक्षणासत्त्वेऽपि यथाश्रुतविशिष्टान्तराघटितत्वघटितैतल्लक्षणासत्त्वेऽपि च न क्षतिः । तदुद्भावने निग्रहापत्त्या तस्य दोषपदार्थत्वानुपगमादिति.

No. 4081. गदाधरीयव्याख्यानम्—चन्द्रनारायणीयम्.

GADĀDHARĪYAVYĀKHYĀNAM: CANDRANĀRĀYAṆĪYAM.

Substance, paper. Size, 13¼ × 4¼ inches. Pages, 86. Lines, 9 on a page. Character, Grantha and Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Sāmānyaniruktipatra 45*a*, Sāmānyaniruktiprathamalakṣaṇavicāra 70*a*, Tryambakaśāstripatra 86*a*.

A commentary on Gadādharīya by Candranārāyaṇa.

Sāmānyanirukti complete.

Beginning:

अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमिति हेत्वाभासलक्षणे अनुमितिपदस्य तत्पक्षकतत्साध्यकानुमितिपरत्वे पर्वतो धूमवान्

बह्नेरित्यत्र धूमाभाववद्व(द्वृत्तिव)ह्निरूपव्यभिचारे अव्याप्तिः ; व्यभिचारग्रहस्य व्याप्तिग्रहं प्रत्येव प्रतिबन्धकतया तत्पक्षकतत्साध्यकानुमितिं प्रत्यप्रतिबन्धकत्वादिति ।

End :

किन्तु घटत्वादेरेव तदवच्छिन्नविषयत्वावच्छिन्नप्रतिबन्धकतायास्तत्र सत्त्वात् ; तत्र चानुमितिप्रतिबन्धकताया(अ)सत्त्वात् ; अतो निश्चयपदम् । यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषयतानिवेशे चाननुगमो दुर्वार एवेति परैरननुशीलितः पन्थाः ॥

No. **4082.** गदाधरीयव्याख्या.

GADĀDHARĪYAVYĀKHYĀ.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 94. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, not old.

A commentary on Gadādharīya by Śaṅkarabhaṭṭa.

Pañcalakṣaṇī incomplete.

Beginning :

ननु वह्निव्याप्यो धूम इति ज्ञानं प्रमाणं प्रमितिजनकतावच्छेद-(क)रूपवत्त्वात् इन्द्रियवदिति अनुमानेन धूमज्ञानत्वसामानाधिकरण्येन प्रामाण्यप्रमितिजनकतावच्छेदकरूपव्याप्तिनिश्चयत्वहेतुना नैयायिकेन साधितम्; तच्च न सम्भवति हेतोरसिद्धेः ।

End :

किन्त्वत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्साध्यकत्वम् ; तच्च गुरुधर्मावच्छिन्नसाध्यकेऽपि वर्तत इति नानुपपत्तिरित्याशयेनाह—तादृशगुरुधर्मावच्छिन्नेति । ननु घटत्वविशिष्ट.

No. 4083. गदाधरीयव्याख्या—शङ्करभट्टीया.

GADĀDHARĪYAVYĀKHYĀ : ŚAṄKARABHAṬṬĪYĀ.

Substance, palm-leaf. Size, 18¾ × 1⅝ inches. Pages, 110. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the following parts :—Sāmānyanirukti 1*a*, incomplete. Avayava 29*a*, up to Pratijñālakṣaṇa. Pakṣatā 45*a*, complete. Savyabhicārasāmānyanirukti, incomplete.

By Śaṅkarabhaṭṭa.

Similar to the above.

Beginning :

अनुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयत्वरूपसंबन्धलाभाय संबन्धिपदमिति गदाधरोक्तम् । तत्कल्पे पर्वतो वह्निमान् ह्रदश्च तथेति समूहालम्बनानुमितिप्रतिबन्धकयथार्थज्ञानविषयवह्न्यभाववद्ध्रदादेर्दोषत्वापत्तिः ।

End :

अधिकरणत्वावच्छेदेन गगनाभाववदधिकरणस्य शुद्धस्वरूपसंबन्धेन गगनाभाववदधिकरणात्मकविशिष्टान्तरघटितत्वेनैव सम्भवादितिचेन्न ; तस्यापि लक्षणान्तरत्वात् ॥

No. 4084. न्यायरत्नम्—गदाधरीयटिप्पणम्.

NYĀYARATNAM : GADĀDHARĪYAṬIPPAṆAM.

Substance, palm-leaf. Size, 16⅛ × 1½ inches. Pages, 51. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Saṁśayapakṣatā only.

By Raghunātha.

Similar to the above.

Complete.

Beginning :

अथ पक्षताग्रन्थान्तर्गतसंशयपक्षताविचारः—

व्याप्त्यनन्तरं पक्षधर्मता निरूप्यत इति मूलम् । तत्र व्याप्तिपदस्य व्याप्तिस्वरूपनिरूपणार्थकतया व्याप्त्यनन्तरमित्यस्य व्याप्तिस्वरूपनिरूपणध्वंसाधिकरणकालवृत्तीत्यर्थः । तस्य निरूप्यत इत्यत्र लक्षणादिप्रकारकप्रतिपत्त्यनुकूलव्यापाररूपनिपूर्वकरूपधात्वर्थनिरूपणे अभेदेनान्वयः ।

End :

सामानाधिकरण्यसम्बन्धनिवेशाच्च न पर्वतो वह्न्यभाववानिति ज्ञाने अतिव्याप्तिः । शेषपक्षताग्रन्थे कृष्णम्भट्टलिखिताधिकलेखने विशेषांशाभावाद्विस्तरभयादत्र तद्विचारो न लिखितः । तदनुमोदन्तु दयालवो विद्वांसः ॥

नित्याण्वादिक्रियातर्क्यो जीवेभ्यो भिन्न ईश्वरः ।
ज्ञानाद्यष्टगुणः पायादपायात्तर्कजाद्धि नः ॥

न्यायाम्भोधिनिमज्जनेक्षणमुखायासोद्धृताच्छस्फुरत्-
तर्कत्वेप्सितरम्यरत्नजलसन्मालार्पिता विष्णवे ।
श्रीशायापि निपातिता मतिमतां तर्कान्धकूपस्खल-
द्धीवाचामधिकण्ठमल्पमतिभिर्योद्धारणीया न हि ॥

कार्ष्णभट्टादिकक्रोडग्रन्थक्रोडीकृतिः कृता ।
रघुनाथेनालसानां तच्छीघ्रोपस्थितीप्सया ॥

विशेषयन्तु मत्प्रोक्तान् विशेषान् तर्ककर्कशाः ।
आर्या मात्सर्यमुत्सार्य दृष्ट्वैतज्जातविस्मयाः ॥

न्यायाकूपारपारङ्गतमतितरणीन्मत्सरोद्रेकशून्यान्
मान्यान्विज्ञापयामस्सविनयमिह यन्न्यायरत्नेऽवबद्धम् ।
तत्संशोध्यं परेषामुपकृतिविधये संप्रवृत्ता वयं(यत्)
तस्मादेवात्र धार्ष्ट्यान्न न निजधिषणाप्रौढिसन्दर्शनाय ॥

शके बाणषडद्रीन्दुसम्मिते मासि भाद्रके ।
रघुनाथो न्यायरत्नं शोभकृद्वत्सरेऽकरोत् ॥

Colophon:

इति मीमांसान्यायपञ्चास्यश्रीमद्राघवाचार्यशिष्यस्य पर्वते इत्युपनामकरघुनाथस्य कृतौ गादाधरीटिप्पण्यां न्यायरत्नाभिधायां पक्षताग्रन्थान्तर्गतसंशयपक्षता समाप्ता ।

शरर्तुसप्तेन्दुमिते शाके पूर्णाख्यपत्तने ।
अङ्किता पाठशालायां टिप्पणीयं शिलाक्षरैः ॥

No. **4085.** सव्यभिचारसामान्यनिरुक्तिटिप्पणम्.

SAVYABHICĀRASĀMĀNYANIRUKTIṬIPPAṆAM.

Pages, 26. Lines, 6 on a page.

Begins on fol. 85*a* of the MS. described under No. 4010.

Incomplete.

This is a commentary on Savyabhicārasāmānyanirukti of Gadādhara.

Author unknown.

Beginning:

साध्यसन्देहजनकत्वं कोटिद्वयोपस्थितिजनकत्वं च लभ्यते ; नित्यत्वादिसाध्यकज्ञानादिहेतौ वक्ष्यमाणातिव्याप्तिर्वारयितुमशक्यैव ; नित्यत्वतदभावविषयकज्ञानवानयमिति ज्ञानस्य नित्यत्वतदभावोपस्थापकत्वाद्धर्मितावच्छेदकप्रकारकज्ञानमुद्रया तादृशज्ञानवदिदन्त्वावच्छिन्नधर्मिकनित्यत्वसंशयहेतुत्वाच्च ।

End:

बाधादिवारणाय विवक्षणीयस्य पक्षे साध्यवैशिष्ट्यग्रहाविरोधित्वस्य लाभाय पक्षपदं व्याचष्टे—पक्ष इति । सन्दिग्धसाध्यः सन्दिग्धसाध्यविशिष्टः धर्मी पक्ष(:).

No. **4086.** तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚĪ.

Substance, paper. Size, 15 × 4⅜ inches. Pages, 670. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A commentary on Tattvacintāmaṇidīdhiti of Raghunātha-Śirōmaṇi by Jagadīśa.

Beginning :

सस्मिताननसरोजमङ्गणे रिङ्गमाण[वि]म(ति)लोलकुण्डलम् ॥
रोचनोल्लसितफालमस्तु मे कैशवं मनसि शैशवं वपुः ॥

प्राच्यैरनुचितविविधक्षोदैः कलुषीकृतोऽप्यधुना ।
दीधितियुतमणिकोशः श्रीजगदीशप्रकाशितः स्फुरतु ॥

ओं नम इति । परमात्मने सर्वोत्कृष्टात्मने नमः । उत्कर्षश्च उत्पत्तिस्थित्यादिकर्तृत्वम् । तस्य चैकत्वेन तत्तत्संभवो न सहकार्यन्तरं विना इत्यत आह—ओमिति । ब्रह्मविष्णुशिवात्मकायेत्यर्थः । तथा च तत्तच्छरीरसहकारात् नानाकार्यकर्तृत्वं नानुपपन्नमिति भावः ।

*   *   *   *

सङ्गतिप्रदर्शनप्रतिज्ञयोरर्थान्तरत्वं निराचिकीर्षुः तयोः प्रकृतोपयोगितां दर्शयति––पूर्वापरेत्यादिना । अत्र च प्रसङ्गप्रदर्शनस्य फलमेकवाक्यताप्रतिपात्तिः, प्रतिज्ञायास्तु फलं शिष्यावधानम् ; तच्चोत्तरग्रन्थप्रवृत्त्यनुकूलव्यापरकत्वरूपम् । तत्त्वनुकूलवर्तमानकृतिसाध्यवत्ताज्ञानादिपर्यवसितम् ।

End :

समुदायस्य व्याप्यत्व(त्वेन) इति । सम्भवतीति शेषः । इत्यत्र दूषणे तात्पर्यमिति । जन्यत्वाद्येना(त्यन्ता)भावस्यैकत्वप्रदर्शनेन जन्यत्वाद्यवच्छिन्नभेदस्याप्येकत्वमूलस्वरससिद्धत्वात् इति भावः ॥

कुर्वन्ति नित्यमनुमानमणेरनेके प्रायः प्रयासमधिदीधिति नीतिभाजः ।
एषा पुनस्तदपि नैव निजं निगूढमर्थं प्रकाशयति तेन ममैष पन्न(यत्न): ॥

Colophon :

इति श्रीमहोपाध्यायजगदीशतर्कालङ्कारविरचितानुमानदीधितिटिप्पणी समाप्ता ॥

No. **4087.** तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚĪ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 113. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, not old.

Savyabhicāra, complete.

Contains the corresponding portion of Tattvacintāmaṇi 49*a*, Dīdhiti 51*a*.

Same work as the above.

No. **4088.** तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚĪ.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 201. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Vyāptivāda complete in Anumānakhaṇḍa.

Same work as the above.

No. **4089.** तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚĪ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 87. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Siddhāntalakṣaṇa and Avacchēdakatānirukti, with Dīdhiti complete and Sāmānyanirukti incomplete.

Same work as the above.

No. **4090.** तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚI.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 265. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vyutpattivāda 135*a*. Leaves 3 and 4 are lost.

Contains the Caturdaśalakṣaṇī, Siddhāntalakṣaṇa, Pakṣatā and Avacchēdakatānirukti.

Same work as the above.

श्रीमन्नैध्रुवकाश्यपगोत्रोद्भवस्य श्रीमद्वेङ्कटाचार्यविपश्चितः पुत्रेण वेङ्कटराघवसूरिणा रचि(लिखि)तमनुमानखण्डे जगदीशकृतं व्यधिकरणं समाप्तं परीधाविनामहायने मिथुनमासे श्वेतपक्षे पञ्चम्याम् ॥

No. **4091.** तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚI.

Pages, 65. Lines, 13 on a page.

Begins on fol. 9*a* of the MS. described under No. 4071.

Vyadhikaraṇadharmāvacchinnābhāva only.

Same work as the above.

No. **4092.** तत्त्वचिन्तामणिदीधितिव्याख्या—भवानन्दीया.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : BHAVĀNANDĪYĀ.

Substance, paper. Size, 11⅛ × 4¼ inches. Pages, 128. Lines, 12 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

A commentary on Tattvacintāmaṇidīdhiti of Raghunātha-Śirōmaṇi.

By Bhavānanda-Vāgīśa.

Beginning :

श्रीगोविन्दपदाम्भोजनखचन्द्रमरीचयः ।
सञ्चरिष्णोस्तमस्यन्धे मम सन्त्ववलम्बनम् ॥
नमस्कृत्य गुरून् सारं निगूढं मणिदीधितौ ।
श्रीभवानन्दसिद्धान्तवागीशेन वितन्यते ॥

ओं नम इति । परमात्मने सर्वापेक्षया उत्कृष्टात्मने नमः । उत्कर्षश्च जगतः सृष्टिस्थितिलयकर्तृत्वम् । एकरूपस्य कथं सृष्ट्यादिविचित्रकार्यकारित्वम्? तत्र हेतुमाह—ओमिति । ब्रह्मविष्णुरुद्रात्मकायेत्यर्थः । ओंकारघटकैरकारोकारमकारैर्ब्रह्मादीनां प्रतिपादनात् । तस्य च नमस्कार्यताप्रयोजकरूपान्तरं दर्शयति—सर्वेति । . . . .
ननु सङ्गतिप्रदर्शनानुमाननिरूपणप्रतिज्ञयोः प्रयोजनाभावः; (अ)सङ्गताभिधानस्य उन्मत्तप्रलपितत्वादिशङ्कानिरासादिप्रयोजनवत्त्वादत आह—पूर्वापरेति । सङ्गतिप्रदर्शनस्य फलमेकवाक्यताप्रतिपत्तिः ।

See under the next number for the end.

No. 4093. तत्त्वचिन्तामणिदीधितिव्याख्या—भवानन्दीया.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : BHAVĀNANDĪYĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 280. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains Anumāna to the end of Sāmānyalakṣaṇa.

Same work as the above.

For the beginning, see under the previous number.

End :

अत्रेदमवधेयम्—

तन्तुत्वेन पटत्वेन कार्यकारणभावे पटस्य समवायेन व्याप्यता

तन्तूनां तादात्म्येन व्यापकता । एवं यदा पटोत्पत्तिरुत्पत्तिसम्बन्धेन पटो वा तत्पूर्वकाले तन्तुरित्येवंरूपा कालिकव्यापक . . . . व्यापकताद्वयेन तत्र निविशते । तत्तत्तन्तुत्वेन तत्पटत्वेन कार्यकारणभावे तु यदा तत्पटः तत्पूर्वं तत्तन्तुरित्येवंविधा कालिकव्यापकतैव निविष्टा न तु यत्र तत्पटः तत्र तत्तन्तुरित्येवंविध.

No. **4094.** तत्त्वचिन्तामणिदीधितिव्याख्या—भवानन्दीया.
TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ :
BHAVĀNANDĪYĀ.

Pages, 212. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4009.

Contains Saṅgatyanumiti, Pañcalakṣaṇī, Caturdaśalakṣaṇī and Siddhāntalakṣaṇa.

Same work as the above.

No. **4095.** तत्त्वचिन्तामणिदीधितिव्याख्या—भवानन्दीया.
TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ :
BHAVĀNANDĪYĀ.

Pages, 68. Lines, 10 on a page.

Begins on fol. 14*a* of the MS. described under No. 4005.

Breaks off in Vyadhikaraṇadharmāvacchinnābhāva.

Same work as the above.

No. **4096.** तत्त्वचिन्तामणिदीधितिव्याख्या--भवानन्दीया.
TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ :
BHAVĀNANDĪYĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 213. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Anumāna incomplete. Breaks off in Caturdaśalakṣaṇī.

Same work as the above.

No. 4097. तत्त्वचिन्तामणिदीधितिव्याख्या--भवानन्दीया.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : BHAVĀNANDĪYĀ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 148. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in Miśralakṣaṇa in the Anumāna-prakaraṇa.

Same work as the above.

No. 4098. भावानन्दीप्रकाशः.

BHĀVĀNANDĪPRAKĀŚAḤ.

Substance, paper. Size, 13½ × 5¼ inches. Pages, 804. Lines, 14 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Up to Sāmānyalakṣaṇa.

This is a gloss by Mahādēva on Bhavānanda's commentary on the Dīdhiti of Raghunātha-Śirōmaṇi.

Beginning :

नत्वा पदाम्भोजयुगं शिवस्य स्मृत्वा गुरूक्ताखिलमुक्तिजातम् ।
कृत्वातिगूढार्थविभावनां च व्याख्यायते व्याप्तिरहस्यमत्र ॥

ननु अनुमानप्रामाण्यव्यवस्था[श्री]निर्वाहको व्याप्तिग्रहोपाय एव कथनार्हो न तु व्याप्तिस्वरूपं कथनार्हम्; प्रयोजनाभावादिति नन्वित्यादिना व्याप्तिस्वरूपनिरूपणारम्भणं व्यर्थम् । न चानुमितिलक्षणघटकतया व्याप्तिस्वरूपं कथनार्हमेवेति वाच्यम् ।

End :

तादृशेति । घटप्रकारकेत्यर्थः । तादृशेति । घटत्वांशेऽन्याप्रकारकेत्यर्थः । एवमग्रेऽपीति । घटज्ञाने घटत्वप्रकारकज्ञाने(इ)त्यर्थः ॥

समान्यलक्षणाव्याख्या कृता सा मान्यलक्षणा ।
विद्वांसस्सन्तु सुप्रीताः तया सामान्यलक्षणाः ॥

Colophon :

इति श्रीमहा . . मकरोपनामकमहादेवपण्डितविरचिते अनुमानमणिदीधितिव्याख्याभवानन्दीयव्याख्याने भावानन्दीप्रकाशाभिधे सामान्यलक्षणप्रकाशस्समाप्तः ॥

No. **4099.** भावानन्दीप्रकाशः.

BHĀVĀNANDĪPRAKĀŚAḤ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 127. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Anumāna incomplete.

By Dinakara.

Similar to the above.

Beginning :

प्रद्योतनस्तिमिरवारणवारणाय सञ्चारयन्निजकराग्रलसन्नखानि ।
उन्निद्रयन्नखिललोकविलोचनानि भूयात्तमोनिरसनाय च नश्शिवाय ॥

विद्वद्वृन्दधुरीणस्य पितुः पादावनुस्मरन् ।
भवानन्दवचोव्याख्यां ब्रूते दिनकरस्सुधीः ॥

ग्रन्थारम्भे विघ्नविघाताय कृतं गुरुप्रणतिरूपं मङ्गलं शिष्यशिक्षायै स्वकीर्त्यनुवृत्तये स्वनाम च निबध्नन् चिकीर्षितं प्रतिजानीते—नमस्कृत्येति । परमात्मन इत्यत्र जीवव्यावर्तनायोत्कृष्टार्थकं परमपदमुपात्तम् ।

* * * *

सङ्गतिप्रदर्शनवदेकवाक्यताप्रतिपत्तेरपि प्रकृतानुपयोगित्वमाशङ्क्याह—प्रयोजनेति । तदेकवाक्यताज्ञानेनेति । वक्ष्यमाणैकवाक्यत्वस्य दण्डचक्रादिन्यायेन एकफलजनकत्वव्याप्यत्वात् प्रकृते प्रत्यक्षग्रन्थानुमान-

ग्रन्थयोरेककार्ये दण्डचक्रन्यायेन कारणत्वावगमात्प्रत्यक्षग्रन्थे प्रवृत्तस्यानुमानग्रन्थेऽपि तत्फलार्थप्रवृत्तिरिति भावः ।

End:

ज्ञानत्वेनैवेति । अथ ज्ञानत्वेनैवानुमितिहेतुत्वे संशयात्मकपरामर्शादनुमित्यापत्तिवारणाय जनकतावच्छेदककोटौ निश्चयत्वं निवेशनीयमिति गौरवम् । परामर्शत्वजातिस्वीकारे च संशये परामर्शत्वजात्यनभ्युपगमेनैव ततोऽनुमितिवारणसम्भवात् जनकतावच्छेदककोटौ निश्चयत्वं न निवेश्यत इति लाघवात्परामर्शत्वजातिसिद्धिः.

No. **4100.** भावानन्दीप्रकाशिका.

BHĀVĀNANDĪPRAKĀŚIKĀ.

Pages, 36. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 3975.

By Vajraṭaṅka.

Similar to the above.

Incomplete.

Beginning:

करुणासारकटाक्षां कल्पितकादम्बवासरुचिम् ।
काञ्चन काञ्चनगौरीं कान्ति कामं नमस्यामः ॥

संप्रदायानुसारेण विद्वद्धृदयरञ्जनी ।
क्रियते वज्रटङ्केन भवानन्दप्रकाशिका ॥

विनाधिकरणाक्षेपं वीरवल्लीभवाङ्कुरः ।
कीर्तिरूर्जस्वला तस्य शास्त्रसञ्चरणे रसः ॥

रणाङ्कणमनासज्य वीरवल्लीभवाङ्कुरः ।
स खलु श्लाघते तेन कुर्मश्शास्त्ररणे रसम् ॥

पृच्छेयुर्यदि केचिदत्र मुखरा भूयस्स्थितेष्वाकर-
ग्रन्थेष्वस्य फलं किमस्ति तदमूनेते प्रतिब्रूमहे ।
नैवास्ते किमपि प्रयोजनमनालोके त्वथालोक्यते
रक्षाबन्धपुरस्सरेण मनसैवेदं समाधास्यते ॥

स्कन्दः क्रौञ्चविदारणे कलशभूरम्भोधिनिश्शोषणे
कृष्णः कालियशासने दिनमणिर्यद्वत्तमोविद्रवे ।
प्रावर्तिष्ट गरिष्ठदीधितिवचोविध्वंसनेऽसौ तथा
नानातर्कतरङ्गधौतवचनन्यासेन कृष्णः कृती ॥

श्रीगोविन्देति । पदाम्भोजेत्यत्र परिणामः, नखचन्द्र इत्यत्र रूपकं, तमस्यन्धेत्यत्रातिशयोक्तिः, दुरवगाहशास्त्रार्थसंघातस्यान्धतमसत्वेन रूपणात्, पूर्वोक्तप्रीयमाणवाक्यपर्यालोचनया वाक्यान्तरप्रतिपादनरूपस्य व्याख्यानस्य सञ्चारत्वेन रूपणाच्च तेषाञ्च त्रयाणां समप्राधान्येन गोविन्दविषयकप्रीतिभावाङ्गत्वेनालङ्कारसंसृष्टिर्बोध्या । निगूढमिति । मणिदीधितौ सर्वतः प्रसृमरेष्वपि सवितृकिरणेषु सूक्ष्माग्ररेणुजालच्छायादिवत् स्फुटमप्रतीयमानतया निगूढं सिद्धान्तरहस्यार्थजातं यथा ईक्षणकौशलशिक्षया परो ग्राह्यते, तथा स्फुटार्थकविवरणविशेषणाय तादृशार्थजातं प्रकाश्यत इत्यर्थः । एतेन दीधितौ निगूढमिति आपाततो विरोधः परिहृतो भवति । स्वग्रन्थस्यासाधारणप्रयोजनञ्च दर्शितं भवतीति बोध्यम् । ओं नम इतीति । अत्र ओमिति विशेष्यम् । परमात्मन इत्यादिविशेषणम् । ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्स्मृतः । समस्तव्यस्तं

त्वां शरणं गृणात्योमितिपदमित्यादिवचनजातैरोङ्कारस्य ईश्वराख्ये तुरीयवस्तु(नि)रूढत्वात् परमात्मपदस्य यौगिकत्वात् । यौगिकरूढयोश्च रूढस्यैव विशेष्यत्वात् ।

End:

स्वयमनुमाने उपमानस्यासङ्गतिरेवोक्ता । ये तु तत्राप्युपजीवकत्वमेव सङ्गतिरिति व्याचक्षते, तन्मतं दर्शयतीत्याह ... शब्दान्तर य(इ)तीति । अन्तपदं व्याचष्टे—उपमितिविषयीभूतेति । उपमितिविषयीभूतं यत् गवयपदं तदतिरिक्तगोपदसदृशादिपदेत्यर्थः । गवयपदस्य तु.

No. 4101. तत्त्वचिन्तामणिदीधितिव्याख्या.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ.

Substance, palm-leaf (Śrītāla). Size, $14\frac{1}{8} \times 2\frac{1}{8}$ inches. Pages, 231. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, old.

Caturdaśalakṣaṇī and Vyāptivāda complete.

A commentary on the Tattvacintāmaṇidīdhiti of Raghunātha-Śirōmaṇi by Vajraṭaṅkaśāstrin.

Beginning:

दीधितौ हेतुसमानाधिकरणस्य व्याप्यवृत्तेरिति । तादृशहेतुसमानाधिकरणाभावस्य साध्याभावत्वेन केवलाभावत्वेनै(न)वेति द्वेधानिवेशः । आद्ये तादृशाभावप्रतियोगितावच्छेदकत्वेन निवेशो न तु समानाधिकरणत्वावच्छिन्नत्वघटनया । द्वितीये तु तदवच्छेदकत्वस्य सामानाधिकरण्यावच्छिन्नत्वघटिततादृशावच्छेदकत्वे[त्वे]नेति भेदः ।

End:

एवं गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वे । तथाच गुरुधर्मस्य प्रतियोगितानवच्छेदकतया इन्धनत्वावच्छिन्नप्रतियोगिताकवह्न्यभाववद्वृत्ति-

त्वत्वावच्छिन्नाभावाप्रसिद्ध्या वृत्तित्वस्य वृत्ति(त्व)त्वव्यक्तेरेकतया साध्याभाव-
वद्वृत्तित्वत्वातिरिक्ततया वृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकता च.

No 4102. तत्त्वचिन्तामणिप्रकाशव्याख्या—तर्कचूडामणिः.

TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ : TARKACŪḌĀMAṆIḤ.

Substance, palm-leaf. Size, 17⅓ × 1¼ inches. Pages, 277. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tattvanirṇaya 140*a*.

A commentary on Rucidatta's Tattvacintāmaṇiprakāśa by Dharmarājādhvarin, a native of Kaṇḍramāṇikkam.

Contains Anumāna to the end of Mōkṣavāda.

Beginning :

. . . . नप्रतिहततमसां मण्डिते पण्डितानां
बृन्दैः श्रीरामचन्द्रस्मृतिबलविशदाशेषतन्त्रार्थसारः ।
देशे विख्यातवासो विविधगुरुकृपालेशतो लब्धबोधो
न्यायाब्धिं तर्कचूडामणिमिह कुरुते बह्वृचो धर्मराजः ॥

त्रेताग्निधूमाकुलवीथिकाङ्गणे गृहेगृहे यत्र वसन्ति सूरयः ।
अधीतसर्वश्रुतयः कथान्तरे विनिर्जितप्रत्यनुमानवादिनः ॥

तत्र कण्डरमाणिक्यग्रामरत्ननिवासिना ।
मणिप्रकाशविवृतिर्धर्मराजेन तन्यते ॥
दशानामपि टीकानां भङ्गं कुर्वन् क्वचित्क्वचित् ।
अनुमानप्रकाशस्य विवृतिं करवाण्यहम् ॥

अविघ्नपरिसमाप्तये मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—प्रणम्येति । विघ्नध्वंसमिति । यद्यपि ग्रन्थसमाप्तिरेव प्रार्थनीया ;

तथापि विघ्नध्वंसे लोकावगतकारणादेव समाप्तिरिति विघ्नध्वंसमात्रं प्रार्थितम् ।

End:

न्यायशास्त्रजन्यबोधस्योपयोग इत्याह—इतरेति । सिद्धान्तिग्रन्थत्वशङ्कां वारयति ज्ञानेति । समुच्चयमाह ज्ञानेति । उत्तरग्रन्थः स्पष्टार्थः ॥

Colophon:

इति धर्मराजविरचिते तर्कचूडामणौ मोक्षवादः समाप्तः ॥

इति श्रीमत्कण्डरमाणिक्यग्रामरत्ननिवासेना तीवेदे(त्रिवेदि)नारायणात्मजेन धर्मराजेन विरचिते तर्कचूडामणावनुमानपरिच्छेदः समाप्तः ॥

No. **4103.** तत्त्वचिन्तामणिप्रकाशव्याख्या--तर्कचूडामणिः.

TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ : TARKACŪḌĀMAṆIḤ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 100. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Anumāna incomplete.

Same work as the above.

No. **4104.** तर्कभाषा.

TARKABHĀṢĀ.

Substance, paper. Size, $10\frac{1}{8} \times 4\frac{1}{4}$ inches. Pages, 72. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Tarkabhāṣāvyākhyā (Bhāvārthadīpikā) 38*b*.

Complete.

A brief treatise on the Nyāya philosophy by Kēśavamiśra, based on Gautama's Nyāyasūtra and on Nyāyabhāṣya.

Beginning :

बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन ।
संक्षिप्तयुक्त्यन्विततर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमं सूत्रम् । अस्यार्थः—प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्मोक्षप्राप्तिर्भवति । न च प्रमाणादीनां तत्त्वज्ञानं सम्यग्ज्ञानं तावद्भवति; यावदेषामुद्देशलक्षणपरीक्षा न क्रियते । यदाह भाष्यकारः—

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेति ।

End :

इष्टार्थभङ्गो विरोधः इहात्यन्तमु[नु]पयुक्तानां स्वरूपभेदेन भूयोभूयः प्रतिपादनमनतिप्रयोजनानां वा तेषां लक्षणम(णा)करणमदोषाय । एतावतैव बालस्य व्युत्पत्तिसिद्धेः ॥

Colophon :

इति श्रीकेशवमिश्रविरचिता तर्कभाषा समाप्तिमगमत् ॥

No. 4105. तर्कभाषा.

TARKABHAṢĀ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 8. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 53*a*. The other works herein are Nyāyasiddhāntamañjarī 1*a*, Tarkasaṅgrahaparibhāṣā 35*a*.

Incomplete.

Same work as the above.

No. 4106. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches Pages, 84. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. 4107. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf. Size, $12\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 108. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. 4108. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 58. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, new.

Complete.

Same work as the above.

No. 4109. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 42. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in Anumāna-prakaraṇa.

Same work as the above.

No. 4110. तर्कभाषा.
TARKABHĀṢĀ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 61. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tarkabhāṣā-vyākhyā (Cēnnubhaṭṭīyā) 32*a*.

Complete.

Same work as the above.

No. 4111. तर्कभाषा.
TARKABHĀṢĀ.

Pages, 38. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 4052.

Incomplete.

Same work as the above.

No. 4112. तर्कभाषा.
TARKABHĀṢĀ.

Pages, 64. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3943.

Incomplete.

Same work as the above.

No. 4113. तर्कभाषा.
TARKABHĀṢĀ.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 58. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

The transcription of this manuscript was completed on the 11th of Śrāvaṇa-Śuddha in the year Khara by Rāmasvāmiśāstrin.

Complete.

Same work as the above.

No. 4114. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 62. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Tarkasaṅgrahadīpikā 32*a*.

Incomplete.

Same work as the above.

No. 4115. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf. Size, 10½ × 1⅛ inches. Pages, 120. Lines, 5 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Begins on fol. 10*a*. The other works herein are Tarkabhāṣāvyākhyā 1*a*, Rāmāṣṭōttaraśata 61*a*, Bālarāmāyaṇa 62*a*.

Complete.

Same work as the above.

No. 4116. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 40. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 36*a*. The other works herein are Tarkasaṅgrahadīpikā 1*a*, Nyāyabōdhinī (Tarkasaṅgrahavyākhyā) 23*a*, Tarkabhāṣāvyākhyā 38*a*.

Prāmāṇyavāda only : complete.

Same work as the above.

No. 4117. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 24. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Siddhāntadīpa 13*a*.

Breaks off in Anumāna.

Incomplete.

Same work as the above.

No. 4118. तर्कभाषा.

TARKABHĀṢĀ.

Substance, palm-leaf (Śrītāla). Size, $18\frac{1}{4} \times 1\frac{7}{8}$ inches. Pages, 30. Lines, 10 on a page. Character, Kanarese. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Tarkabhāṣāvyākhyā 16*a*, Advaitadīpikā 59*a*.

Complete.

Same work as the above.

No. 4119. तर्कभाषाटीका—तत्त्वप्रबोधिनी.

TARKABHĀṢĀṬĪKĀ : TATTVAPRABODHINĪ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 92. Lines, 13 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in Pañcāvayava.

A commentary on Tarkabhāṣā by Gaṇēśadīkṣita, son of Gōvindadīkṣita.

Beginning:

केशकेशवरूपैर्यः सृजत्यवति हन्ति च ।
तं गणेशमहं वन्दे स्मृतिमात्राघनाशनम् ॥
गोविन्ददीक्षितं तातमुमां नत्वा च मातरम् ।
क्रियते तर्कभाषायाष्टीका तत्त्वप्रबोधिनी ॥

धर्मार्थकाममोक्षरूपेषु पुरुषार्थेषु मध्ये मोक्षस्याभ्यर्हितत्वात् आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्तव्य इति श्रुत्या श्रवणानन्तरभाविमननस्य मोक्षं प्रति कारणत्वावबोधनात्.

* * * *

श्रुतिबोधितकर्तव्यताकं मङ्गलं बहिरेव विधाय प्रेक्षावत्प्रवृत्त्यङ्गे विषयप्रयोजने निर्दिशन् चिकीर्षितं प्रतिजानीते—बालोऽपीति । एषा तर्कभाषा तर्कस्य भाषा व्याप्यारोपेण व्यापकारोपस्तर्कस्तस्य भाषा स्वरूपकथनमित्यर्थः । मया प्रकाश्यत इति । तन्निमित्तमित्यर्थः । कृते इत्यव्ययम् । काव्यं यशसेऽर्थकृते इत्यत्र अव्ययत्वेन व्याख्यानात् ।

See under the next number for the end.

No. 4120. तर्कभाषाटीका–तत्त्वप्रबोधिनी.

TARKABHĀṢĀṬĪKĀ : TATTVAPRABŌDHINĪ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 92. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

A commentary on Tarkabhāṣā. Breaks off in Guṇaparicchēda. Two leaves in the beginning are lost.

Begins on fol. 1*a*. The other work herein is Pañcapādikāvivaraṇa 47*a*.

See under the previous number for the beginning.

End:

रूपादीनां चतुर्णां प्रत्यक्षताप्रयोजकमाह—एत इति । (ननु) कठिनसुकुमारस्पर्शवदवयवारब्धोऽवयवी कठिनस्पर्शवान् वा स्यात्,

आहोस्वित् सुकुमारस्पर्शवान् चित्रस्पर्शवान् वा स्यादस्पर्शो वा? नाद्यौ, परस्परकलहस्य दुष्परिहरत्वात्; न तृतीयः, गुणविरोधेनारम्भानुपपत्तेः; चित्रस्पर्शे प्रमाणाभावाच्च, अन्यथा चित्ररसगन्धयोरप्यापत्तेः; न चतुर्थः, स्पार्शनप्रत्यक्षत्वाभावप्रसङ्गात्, त्वगिन्द्रियस्य स्पर्शग्रहणपुरस्कारेणैव द्रव्ये प्रवृत्तेः। न च अवयवस्पर्शग्रहणपुरस्कारेणैव तस्य ग्रहणम्; अन्यस्पर्शस्य अन्यत्राध्यक्षतायामप्रयोजकत्वात्, अन्यथा अतिप्रसङ्गात्। न च स्पर्शप्रत्य.

No. 4121. तर्कभाषाप्रकाशः.

TARKABHĀṢĀPRAKĀŚAḤ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 130. Lines, 9 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Pratyakṣa complete. Anumāna incomplete.

A commentary on the Tarkabhāṣā by Akhaṇḍānandasarasvatī, pupil of Svayamprakāśasarasvatī.

Beginning:

श्रीरङ्गराजविदुषो भुवि यस्य तातः श्रीकाल(हस्तिमखिराणलगन्तुवंश्यः)।
(यज्ञाम्बिका च जननी स पुराकृतेन श्री)मानखण्डयतिराट् सुकृतेन जातः॥

स बालसुखबोधाय प्रणमन् कृष्णवाग्गुरून्।
विशिष्य तर्कभाषायाः प्रकाशं तनुते यतिः॥

निरन्तरं ब्रह्मनिष्ठो (ह्य)खण्डयतिराडयम्।
व्याख्येया तर्कभाषेति शिष्यैः कैश्चिदिहार्थितः॥

इह खलु केशवमिश्र इति कश्चिद्विपश्चित्स्वयं न्यायशास्त्रमवलोकयन् स्वकीयेन अल्पव्युत्पत्तिमता प्रौढग्रन्थासमर्थेन अल्पवयसा बालेन इदमवलोक्यमानं किमिति पृष्टः तं प्रति न्यायशास्त्रमित्युत्तरं वदन् पुन-

स्तेनेदमुपदेष्टव्यमिति सादरं पृष्टः कथमयमतिबालकोऽपि न्यायशास्त्रप्रवेशं वाञ्छति आश्चर्यमिति स्वबाले सन्तोषातिशयादयमतिबालको न्यायशास्त्रमवलोकयितुमसमर्थ इति मन्यमानः तच्छास्त्रार्थं संक्षिप्य तर्कभाषारूपेण विरचयन् स्वबालबोधनं प्रयोजनमभिप्रेत्य स्वबालार्थङ्करिष्यमाणस्य ग्रन्थस्य लोकोपकारत्वाच्च स्वग्रन्थे बालकस्य लोकस्य प्रवृत्त्यङ्गं प्रयोजनं सूचयन् चिकीर्षितं प्रतिजानीते—बालोऽपीति । यः बालोऽपि अष्टवर्षोऽपि ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशसरस्वतीपूज्यपादशिष्यश्रीमदखण्डानन्दसरस्वतीविरचिते तर्कभाषाप्रकाशे प्रत्यक्षपरिच्छेदस्समाप्तः ॥

See under the next number for the end.

No. **4122.** तर्कभाषाप्रकाशः.

TARKABHĀṢĀPRAKĀŚAḤ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 178. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Pratyakṣa complete. Anumāna almost complete.

See under the previous number for the beginning.

End:

एवं हेत्वाभासस्वरूपे ज्ञाते तद्विलक्षणतया इदं सद्धेतुपरिज्ञानं न सम्भवति । स्वार्थपरार्थानुमानरूपम्, अन्वयव्यतिरेकिकेव(लान्वयि केवलव्यतिरेकिभेदाभिन्न)मनुमानप्रमाणं सर्वं निरूपितमिति सर्वं रमणीयम् ॥

No. 4123. तर्कभाषाप्रकाशः.

TARKABHĀṢĀPRAKĀŚAḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 102. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Wants beginning and end.

Same work as the above.

No. 4124. तर्कभाषाभावप्रकाशिका.

TARKABHĀṢĀBHĀVAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 230. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

A commentary on Tarkabhāṣā by Gōpīnātha.

Incomplete.

Beginning:

साकूतसस्मितविलोकितजाततृष्णे
कृष्णे करस्पृशि सरोरुहमन्दिरायाः ।
लीलायितं नयनयोर्मनसोऽभिलाषो
डोलायितं श्रवणकुण्डलयोः पुनातु ॥

गोपीनाथेन विदुषा नत्वा हरिपदाम्बुजम् ।
संक्षिप्य तर्कभाषाया भावः कश्चित्प्रकाश्यते ॥

कर्तव्यं विघ्नविघातकं परमेश्वरनत्यादिकं मङ्गलं मनसैवाचरन् प्रेक्षावत्प्रवृत्तिसिद्ध्यर्थमभिधेयाभिधानद्वारा प्रयोजनं सूचयन्नेव इतरग्रन्थापेक्षया स्वग्रन्थस्य वैलक्षण्यं प्रतिपादयति—बालोऽपीति । अधिकव्युत्पत्तिरहितोऽपीत्यर्थः । ग्रन्थान्तरेणात्यन्तव्युत्पन्नस्यैव न्यायतन्त्रप्रवेशो भवतीति तद्वैलक्षण्यमित्यर्थः ।

End:

ननु समर्थत्वं जनकत्वम्; तथाच जनकप्रवृत्तिजत्वं हेत्वर्थ इति पर्य-

वस्यति, तथाच भ्रमे व्यभिचारः, तत्रत्यप्रवृत्तेरपि शुक्त्याद्युपादानजनकत्वादतस्सामर्थ्यशब्दार्थमाह—फलवत्प्रवृत्तीति । फलवच्छब्द इष्टवाची तथाचेष्टाविषयप्रवृत्तिहेतुत्वं हेतुरिति न भ्रमे व्यभिचार इति भावः । चरमन्तज्जाति.

No. **4125.** तर्कभाषाव्याख्या.

TARKABHĀṢĀVYĀKHYĀ.

Substance, palm-leaf. Size, 13 × 1¼ inches. Pages, 98. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in Anumāna.

A commentary on Tarkabhāṣā by Gōvardhanasudhī.

Beginning:

यस्तर्कभाषामनुभाषते स गोवर्धनस्तर्ककथासु धीरः ।
तेनानवद्येन सुधांशुगौरी कीर्तिर्गुरूणाममृताधिकास्तु ॥
विजयश्रीतनूजन्मा गोवर्धन इति श्रुतः ।
तर्कानुभाषां तनुते विविच्य गुरुनिर्मिताम् ॥
श्रीविश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा ।
जानाति तर्कानधिगत्य सर्वान् श्रीपद्मनाभाद्विदुषो . . ना ॥

शिष्यप्रवृत्तयेऽभिधेयं प्रतिजानीते—बालोऽपीति । एषा संक्षिप्तयुक्त्यन्विततर्कभाषा प्रकाश्यते । तर्काः षोडश पदार्था भाष्यन्तेऽनयेति तर्कभाषा । गौतमप्रणीतसूत्ररूपा न्यायविद्या सा विशदीक्रियत इत्यर्थः ।

End:

ननु द्व्यणुकस्थले क्लृप्तत्वादसमवायिकारणनाशादेव द्रव्यनाशोऽस्तु । न च तन्तुषु नष्टेषु संयोगनाशप्रतीक्षायां समवायिकारणं विना क्षणद्वयं द्रव्यावस्थितिः स्यादिति वाच्यम्; कारणान्तरकल्पने गौरवेण

तथैवोचितत्वादिति चेत् न—कपालनाशत्वेन जनकतायां तत्समवेतनाशत्वेनैव जन्यता न तु द्रव्येतरेत्यपि विशेषणम्; गौरवात्। द्वयोर्द्रव्यनाशकत्वेऽननुगम इति चेन्न; निमित्तकारणेत्यकार.

No. **4126.** तर्कभाषाव्याख्या—चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ: CĒNNUBHAṬṬĪYĀ.

Pages, 80. Lines, 11 on a page.

Begins on fol. 16*a* of the MS. described under No. 4118.

Complete.

A commentary on Tarkabhāṣā by Cēnnubhaṭṭa, son of Hariharamahārādhyasarvajñaviṣṇudēvācārya, brother of Sarvajña.

Beginning:

भवसञ्चितपापौघविध्वंसनविचक्षणम्।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे॥
सकृत्नत्वापि यं लोको लभते शान्तिसम्पदः।
स नः पायादपायेभ्यो योगानन्दनृकेसरी॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय शिष्टाचारपरिप्राप्तविशिष्टेष्टदेवताप्रणामरूपं मङ्गलं मनसि निधाय तत्र प्रेक्षावतां प्रवृत्तिसिद्धये विषयप्रयोजने निर्दिशन् चिकीर्षितं प्रतिजानीते—बालोऽपीति। एषा मया प्रकाश्यत इति क्रियाकारकयोजना। एषेति। केत्याकाङ्क्षायामाह—तर्कभाषेति। तर्कः तर्कशास्त्रं (तर्कशास्त्रे) प्रमा(णा)दयः पदार्था ईदृग्लक्षणा इयन्त एवेति तेषां स्वरूपकथनं भाषा।

End:

इहेति। रूपभेदज्ञानं ग्रन्थान्तरपरिशीलनेन भविष्य[ती]ति। (इह तु अनुपयुक्तं रूपभेदमवलम्ब्य व्युत्पादना . . . . . बालव्यु)त्पादनञ्च सामान्यनिरूपणेनैव ज्ञातमिति रूपभेदानिरूपणस्य अनौचितं(ती)नास्तीति सर्वमवदातम्॥

Colophon :

इति श्रीहरिहरमहाराध्यसर्वज्ञविष्णुदेवाचार्यतनूजेन सर्वज्ञानुजेन चेन्नुभट्टेन विरचितायां तर्कभाषाव्याख्यायां तर्कभाषाप्रकाशिकायां प्रमेयादिपरिच्छेदस्समाप्तः ॥

No. **4127.** तर्कभाषाव्याख्या–चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ : CĒNNUBHAṬṬĪYĀ.

Substance, palm-leaf. Size, 18 × 1⅓ inches. Pages, 165. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. **4128.** तर्कभाषाव्याख्या–चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ : CĒNNUBHAṬṬĪYĀ.

Substance, palm-leaf (Śrītāla). Size, 21 × 1¾ inches. Pages, 80. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Incomplete.

Begins on fol. 1*a*. The other work herein is Vēdāntaprakaraṇa grantha 41*a*.

Same work as the above.

No. **4129.** तर्कभाषाव्याख्या–चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ : CĒNNUBHAṬṬĪYĀ.

Substance, palm-leaf. Size, 11⅞ × 1½ inches. Pages, 134. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

Breaks off in Pramēya-paricchēda.

Same work as the above.

No 4130. तर्कभाषाव्याख्या—चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ : CĒNNUBHAṬṬĪYĀ.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{5}{8}$ inches. Pages, 92. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

In the beginning 6 leaves are lost.

Incomplete.

Same work as the above.

No. 4131. तर्कभाषाव्याख्या—चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ : CĒNNUBHAṬṬĪYĀ.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 110. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 11*a*. The other work herein is Anantavratakathā 1*a*.

Breaks off in Pakṣatā.

Same work as the above.

No. 4132. तर्कभाषाव्याख्या—चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ : CĒNNUBHAṬṬĪYĀ.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{3}{4}$ inches. Pages, 90. Lines, 11 on a page. Character, Telugu. Condition, injured. Appearance, new.

Wants beginning and end.

Same work as the above.

No. 4133. तर्कभाषाव्याख्या--चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ : CENNUBHAṬṬĪYĀ.

Pages, 68. Lines, 8 on a page.

Begins on fol. 32*a* of the MS. described under No. 4110.

Incomplete.

Same work as the above.

No. 4134. तर्कभाषाव्याख्या--भावार्थदीपिका.

TARKABHĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Pages, 414. Lines, 12 on a page.

Begins on fol. 38*b* of the MS. described under No. 4104.

A commentary on Tarkabhāṣā by Gaurīkānta.

Complete.

Beginning :

ओं तत्सदेभिः प्रतिपादिताय नित्याखिलेच्छाकृतिधीयुताय ।
लीलाघनश्यामकलेबराय नमोऽस्तु तस्मै जगदीश्वराय ॥

उज्वला तर्कभाषाया इयं भावार्थदीपिका ।
भट्टाचार्येण धीरेण गौरीकान्तेन तन्यते ॥

मातर्भारति हे शिरोमणिवचोव्याख्यानसत्कौशलैः
साहङ्कारतयैव केशवकृतिव्याख्यासु किं लज्जसे ।
कर्पूरप्रचुरोल्लसत्खदिरयुक्ताम्बूलजो वाधरे
रागो यावकजोऽथ वा यदि तदा का नाम शोभाक्षतिः ॥

इह खलु प्रेक्षावन्तोऽधिकार्यभिधेयप्रयोजनसंबन्धान् प्रतीत्यैव तदध्ययनादौ प्रवर्तन्ते । तदुक्तम्—

सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः संबन्धस्सप्रयोजनः ॥ इति ॥

अतः प्रारिप्सितस्वग्रन्थे प्रेक्षावत्प्रवृत्तये प्रयोजनाभिधेयसंबन्धान् दर्शयन् शिष्यावधानाय तर्कभाषाप्रकाशनं प्रतिजानीते—बालोऽपीति । बाल इव बालः प्रकृतशास्त्रीयपरिभाषानभिज्ञ इत्यर्थः । अग्निर्माणवक इतिवत् गौणप्रयोगः । अलसः दुरूहभाष्यादिग्रन्थभावार्थबोधानुकूलबहुतराभ्यासाविधायकसामर्थ्यविकलः ।

एवंभूतोऽपि सन् ।

End:

तेषां वादजल्पयोरेवानपेक्षितत्वात् विद्यार्थिनस्तु गुरुणा सतीर्थ्यैर्वा सहवादकथायामेव अधिकाराद्बालव्युत्पत्त्यर्थमेवास्य ग्रन्थस्य कृतत्वादिति भावः । एतदेव दर्शयति एतावतैवेत्यादिना ।

हे धीरास्तर्कभाषायां न कर्तव्यावधीरणा ।
शास्त्रार्थस्सर्व एवास्यां सूत्रवद्विद्यते यतः ॥

नावज्ञेया तर्कभाषा बालकैर्दूष्यते इति (यदि) ।
वानरैर्लङ्घितोऽप्येष नागाधः किं महोदधिः ॥

अन्येषामपि संविलोक्य विवृतीस्सम्यग्विभाव्याकरं
मात्सर्यं मनसा विहाय कलयन् व्याख्यां मदीयामपि ।
भावार्थं प्रतिसन्दधाति हृदये कोऽपीह धीरो यदि
स्यादेवात्र तदा विनिर्मितिविधौ श्लाघ्यो ममायं श्रमः ॥

पिपाठयिषता बालान् शिष्याणामिह काम्यया ।
भट्टाचार्येण धीरेण कृता भावार्थदीपिका ॥

Colophon:

इति श्रीमहोपाध्यायगौरीकान्तसार्वभौमभट्टाचार्यविरचिता भावार्थदीपिका नाम तर्कभाषाटीका समाप्तिमगमत् ॥

No. 4135. तर्कभाषाव्याख्या--भावार्थदीपिका.

TARKABĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 186. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Two leaves are wanting.

Same work as the above.

No. 4136. तर्कभाषाव्याख्या--भावार्थदीपिका.

TARKABĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 46. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants beginning.

Same work as the above.

Incomplete.

No. 4137. तर्कभाषाव्याख्या--भावार्थदीपिका.

TARKABHĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 22. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, very old.

Begins on fol. 1*a*. The other work herein is Tarkapatra 12*a*.

Wants beginning and end.

Same work as the above.

No. 4138. तर्कभाषाव्याख्या--भावार्थदीपिका.

TARKABĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Pages, 22. Lines, 6 on a page.

Begins on fol. 38*a* of the MS. described under No. 4116.

The commentary is here called Ujjvalā.

Only Prāmāṇyavāda complete in Pramāṇaparicchēda.

Same work as the above.

No. 4139. तर्कभाषाव्याख्या—भावार्थदीपिका.

TARKABĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 104. Lines, 6 on a page. Character, Telugu and Nandināgarī. Condition, injured. Appearance, old.

Wants beginning and end.

Same work as the above.

No. 4140. तर्कभाषाव्याख्या--भावार्थदीपिका.

TARKABĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, 16½ × 1⅜ inches. Pages, 63. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Pramāṇa-paricchēda incomplete.

Same work as the above.

No. 4141. तर्कभाषाव्याख्या--भावार्थदीपिका.

TARKABĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 126. Lines, 6 on a page. Character, Nandināgarī. Condition, good. Appearance, new.

Breaks off in Prāmāṇyavāda.

Same work as the above.

No. 4142. तर्कभाषाव्याख्या.

TARKABHĀṢĀVYĀKHYĀ.

Pages, 78. Lines, 10 on a page.

Begins on fol. 42*a* of the MS. described under No. 4033.

From Samavāyikāraṇa in Pratyakṣa to Śabdaparicchēda complete. Breaks off in Guṇaparicchēda.

Author unknown.

Beginning:

समानकालोत्पन्नत्वात् पौर्वापर्याभावेन कारणत्वाभावात् समवायिकारणत्वमपि न संभवतीति चेन्न; सम . . . . सिद्धत्वात्। यदि च समानकालोत्पत्तिः, तदा सामग्रीभेदाभावेन कार्यभेदो न स्यात्; कारणभेदनियतत्वात् कार्यभेदस्येति ग्रन्थकृत् ।

* * * *

न तत्रातीव प्रदोषः कार्य इति तत्प्रणीतं सर्वं वैदिकवाक्यमाप्तप्रणीतं लौकिकवाक्यं च प्रमाणमिति सिद्धम्; येभ्यः प्रत्यक्षादिभ्योऽन्यन्न प्रमाणम् । प्रमाणत्वेनाभिमतस्याप्यत्रैवान्तर्भावादिति ॥

End:

स्मृतौ संस्कारसिद्धस्यानुभवस्य का(कार)णत्वेन मनसः करणत्वाभावात् । यदि स्मृतावपि मन[स]ः कारणन्तदा संस्कार एव संबध्यत इति न व्यभिचारः ॥

Colophon:

इति शब्दपरिच्छेदः ॥

No. **4143.** तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 14. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Tarkasaṅgrahavyākhyā (Nyāyabōdhinī) 8*a*, Tarkāmṛta 21*a*, Tarkasaṅgrahadīpikā 37*a*.

Complete.

An elementary exposition of the Nyāya and the Vaiśēṣika systems of philosophy: by Annam-bhaṭṭa.

Beginning:

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः । तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।

End :

सर्वेषामि(मे)व पदार्थानां यथायथमुक्तेष्वेवान्तर्भावात् सप्तैव पदार्था इति सिद्धम् ॥

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नंभट्टेन विदुषा रचितस्तर्कसङ्ग्रहः ॥

No. **4144.** तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Pages, 11. Lines, 8 on a page.

Begins on fol. 69*a* of the MS. described under No. 3949.

Complete.

Same work as the above.

No. **4145.** तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 12. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

No. **4146.** तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 38*a* of the MS. described under No. 1193.

Complete.

Same work as the above.

No. 4147. तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 11. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 26*a*. The other work herein is Naiṣadha 1*a*.

Complete.

Same work as the above.

No. 4148. तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Substance, paper. Size, $10\frac{1}{4} \times 4\frac{7}{8}$ inches. Pages, 12. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Tarkasaṅgraha-candrikā 7*b*.

Complete.

Same work as the above.

No. 4149. तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Pages, 20. Lines, 5 on a page.

Begins on fol. 54*a* of the MS. described under No. 3943.

Complete.

Same work as the above.

No. 4150. तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Pages, 11. Lines, 8 on a page.

Begins on fol. 10*a* of the MS. described under No. 240.

Complete.

Same work as the above.

No. 4151. तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Pages, 14. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3953.

Complete.

Same work as the above.

No. 4152. तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 6. Lines, 10 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 11*a*. The other work herein is Tarkasaṅgrahadīpikā 1*a*.

Same work as the above.

Incomplete.

No. 4153. तर्कसङ्ग्रहचन्द्रिका.

TARKASAṄGRAHACANDRIKĀ.

Pages, 70. Lines, 16 on a page.

Begins on fol. 7*b* of the MS. described under No. 4148.

A commentary on Tarkasaṅgraha : by Mukundabhaṭṭa.

Complete.

Beginning :

गलद्दानोद्रेकभ्रमदलिकदम्बावृतशिरो
धुनानस्सन्तोषादिव निजगुरोस्ताण्डवविधेः ।
प्रचण्डैर्दोर्दण्डैः प्रबलतरविघ्नोपशमनो
मनोगम्यं भव्यं वितरतु शिशुः शैलदुहितुः ॥
साम्बं शिवं नमस्कृत्य तर्कसङ्ग्रहचन्द्रिका ।
गाढेकरकुलोत्पन्नमुकुन्देन वितन्यते ॥
प्रणम्य विदुषो नूनमहं कुर्वे निवेदनम् ।
बालबुद्ध्या मदीयोऽयं निबन्धो नावधीर्यताम् ॥

ग्रन्थारम्भे विघ्नोपशमाय विहितं मङ्गलमन्तेवासिशिक्षायै निबध्ना ति— निधार्येति ।

अत्र मङ्गलस्य विघ्नध्वंसद्वारा समाप्तिसाधनतेति प्राञ्चः । तत्र यद्यपि मङ्गलस्य समाप्तिसाधनता न प्रत्यक्षप्रमाणगम्या; कादम्बर्यादौ अन्वयतो नास्तिकग्रन्थादौ व्यतिरेकतो व्यभिचारेण कारणत्वप्रत्यक्षजनने प्रत्यक्षप्रमाणसहकारिणः स्वस्वव्याप्येतरयावत्कारणसत्त्वे यत्सत्त्वे अग्रि- मक्षणे यत्सत्त्वं यदभावे यदभाव इति नियतान्वयव्यतिरेकसहचारग्रहस्या- सम्भवात् ।

End:

विशेषेणेति । सर्वेषां प्रमेयान्तर्भावेऽपि प्रमाणादीनां विशेषरूपेणाभि- धानं विचारेऽभ्यर्हितत्वादिति स्फुटमाकर इति ॥

Colophon:

इति श्रीगाढेगोलोपाख्यमुकुन्दभट्टविरचिता तर्कसङ्ग्रहचन्द्रिका स- माप्ता ॥

श्रीमन्मनोहरोपाख्यविश्वेश्वरगुरोः परम् ।
चरणौ शरणीकृत्य चन्द्रिकेयं समापिता ॥

विबुधा न मुधावमाननीया मनधी(नी) या कृतिरल्पमेधसोऽपि ।
हृदयेऽपि घुणाक्षरापि वाणी ललिता किन्न विराजते कवीनाम् ॥
दस्यवो मयि कृपालुतयैतत्पुस्तकं विलिखितं बहुयत्नात् ।
कर्म मा कुरुत तन्मुषिधातोर्वो नमोऽस्तु शिरसा बहुकृत्वः ॥

No. **4154.** तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Substance, palm-leaf. Size, 14⅜ × 1¼ inches. Pages, 64. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

This is a commentary on Tarkasaṅgraha by Annam-bhaṭṭa himself.

The copying of this manuscript was finished on the new moon-day of Kārttika in the year Śukla.

Complete.

Beginning:

विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरं गुरुम् ।
टीकां शिशुहितां कुर्वे तर्कसङ्ग्रहदीपिकाम् ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्टदेवतानमस्कारलक्षणं मङ्गलं ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—निधायेति । ननु मङ्गलस्य समाप्तिं प्रति साधनत्वं नास्ति; मङ्गले कृतेऽपि किरणावलीग्रन्थे समाप्त्यदर्शनात्, मङ्गलाभावेऽपि कादम्बर्यादौ समाप्तिदर्शनात् अन्वयव्यतिरेकाभ्यां व्यभिचारादिति चेन्न ।

End:

ज्ञानद्वारैव कर्म मोक्षसाधनं, न साक्षात् । तस्मात्पदार्थज्ञानं मोक्षपरमप्रयोजनमिति सर्वं रमणीयम् ॥

Colophon:

इति श्रीमदन्नंभट्टोपाध्यायकृततर्कसङ्ग्रहदीपिका समाप्ता ॥

No. 4155. तर्कसङ्ग्रहदीपिका.
TARKASAṄGRAHADĪPIKĀ.

Pages, 36. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 3930.

Incomplete.

Same work as the above.

No. 4156. तर्कसङ्ग्रहदीपिका.
TARKASAṄGRAHADĪPIKĀ.

Pages, 48. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3936.

Wants beginning.

Same work as the above.

No. 4157. तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Pages, 43. Lines, 7 on a page.

Begins on fol. 8*a* of the MS. described under No. 3953.

Complete.

Same work as the above.

No. 4158. तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 38. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kṛṣṇapūjāvidhāna 20*a*.

Complete.

Same work as the above.

No. 4159. तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Pages, 44. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4116.

The scribe is said to be the son of Tirumalācārya.

Complete.

Same work as the above.

No. 4160. तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Pages, 29. Lines, 7 on a page.

Begins on fol. 37*a* of the MS. described under No. 4143.

Complete.

Same work as the above.

No. 4161. तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Pages, 47. Lines, 8 on a page.

Begins on fol. 45*a* of the MS. described under No. 3949.

Complete.

Same work as the above.

No. 4162. तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Pages, 20. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 4152.

Breaks off in Anumāna.

Same work as the above.

No. 4163. तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Pages, 36. Lines, 9 on a page.

Begins on fol. 32*a* of the MS. described under No. 4114.

Complete.

Same work as the above.

No. 4164. तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 26. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants beginning and end.

Same work as the above.

No. 4165. तर्कसङ्ग्रहदीपिका.
TARKASAṄGRAHADĪPIKĀ.

Substance, palm-leaf. Size, 15⅝ × 1½ inches. Pages, 14. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

No. 4166. तर्कसङ्ग्रहदीपिका.
TARKASAṄGRAHADĪPIKĀ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2565.

Fragmentary.

Incomplete.

Same work as the above.

No. 4167. तर्कसङ्ग्रहदीपिकाव्याख्या—नीलकण्ठप्रकाशिका.
TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĪLAKAṆṬHAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 82. Lines, 7 on a page. Character, Telugu and Grantha. Condition, injured. Appearance, old.

To the end of Śabdaparicchēda and Prāmāṇyavāda ; breaks off in Nigrahasthāna.

A commentary on Annambhaṭṭa's Tarkasaṅgrahadīpikā : by Nīlakaṇṭhabhaṭṭa, son of Rāmabhaṭṭa of Kauṇḍinya-gōtra.

Beginning :

वन्दे गुरुं शिवं साम्बं दक्षिणामूर्तिमव्ययम् ।
यद्वन्दनेन मन्दोऽपि विन्देद्गुरुसमानताम् ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं समाचरितं मङ्गलमीश्वरनत्यात्मकं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते—विश्वेश्वर-

मिति। गिरां गुरुं निखिलविद्यानामुपदेष्टारम् । इदमपि विश्वेश्वरविशेषणम्। गिरं गुरुमिति पाठे तु सरस्वतीं विद्यागुरुश्च प्रणिपत्येत्यर्थो बोध्यः । स्वग्रन्थस्येतरग्रन्थेनागतार्थतां दर्शयति–शिशुहितामिति । तर्कसङ्ग्रहदीपिकां तर्कसङ्ग्रहप्रकाशिकाम् ।

See under the next number for the end.

No. **4168.** तर्कसङ्ग्रहदीपिकाव्याख्या–नीलकण्ठप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĪLAKAṆṬHAPRAKĀŚIKĀ.

Pages, 82. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 3931.

Complete.

This manuscript was completed on the 13th of the dark fortnight of the Vaiśākha month in the year Raktākṣi.

Same work as the above.

See under the previous number for the beginning.

End:

अत्रायं क्रमः—

निष्कामनया भगवत्प्रीत्यर्थं कृतैः कर्मभिर्दुरितक्षयरूपात्मशुद्धिर्भवति ; ततो विषयेषु वैराग्यम् ; ततः श्रवणादौ प्रवृत्तिः ; ततः श्रवणादिक्रमेण तत्त्वज्ञानोत्पत्तौ पूर्वोक्तमिथ्याज्ञाननाशादिक्रमेण मोक्षनिष्पत्तिः । अधिकमस्मदीयाभिनवचिन्तामणिव्याख्यायामनुसन्धेयं तर्ककर्कशविचारचातुरीधुरीणैरिति ॥

कौण्डिन्यगोत्रसंभूतो नीलकण्ठाख्यपण्डितः ।
कृतिमार्पिपदेतस्मै चन्द्रचूडाय मङ्गलम् ॥

Colophon:

इति श्रीमत्पाण्योपनामककौण्डिन्यवंशपयःपारावारराकाचन्द्रायमाण-पदवाक्यप्रमाणपारावारपारीणश्रीरामभट्टतनूजश्रीनीलकण्ठभट्टविदुषा विरचितः तर्कसङ्ग्रहदीपिकाप्रकाशः समाप्तः ॥

No. **4169.** तर्कसङ्ग्रहदीपिकाव्याख्या—नीलकण्ठप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĪLAKAṆṬHAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 24. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 23*a*. The other work herein is Ātmabōdhadīpikā 1*a*.

Wants beginning and end.

Same work as the above.

No. **4170.** तर्कसङ्ग्रहदीपिकाव्याख्या—नारसिंहप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĀRASIṀHAPRAKĀŚIKĀ.

Substance, paper. Size, $11 \times 8\frac{1}{2}$ inches. Pages, 659. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

A commentary on the Dīpikā of Annambhaṭṭa: by Rāya-Narasiṁha of Āḷūri family, pupil of Bālakṛṣṇa.

Complete.

Beginning:

ध्यात्वा श्रीमातृपादाब्जे दीपिकायाः प्रकाशकः ।
श्रीरायनरसिंहेन पण्डितेन चिकीर्ष्यते ॥

